"घृतं हविष्यमाज्यञ्च हविराघारसर्पिषी ॥"
इति हेमचन्द्रः ॥

हविष्यान्नम् । यथा,—
"त्रयोदश्यां कृतस्नानो ब्रह्मचारी समाहितः ।
निरामिषं हविष्यं वा सकृद्भुञ्जीत नान्यथा ॥"
इति शिवरात्रिव्रतकथा ॥*॥

अन्नञ्च ।
"हेमन्ते प्रथमे मासि नन्द व्रजकुमारिकाः ।
चेरुर्हविष्यं भुञ्जानाः कात्यायन्यर्च्चनव्रतम् ॥"
इति श्रीमद्भागवतम् ॥

हविष्यान्नं, क्ली, (हविष्यमन्नम् ।) व्रतादौ भक्षणीयद्रव्यविशेषः । यथा, स्मृतिः ।
"हैमन्तिकं सितास्विन्नं धान्यं मुद्गास्तिला यवाः ।
कलायकङ्गुनीवारा वास्तूकं हिलमोचिका ॥
षष्टिका कालशाकञ्च मूलकं केमुकेतरत् ।
लवणे सैन्धवसामुद्रे गव्ये च दधिसर्पिषी ॥
पयोऽनुद्धृतसारञ्च पनसाम्रहरीतकी ।
तिन्तिड़ी जीरकञ्चैव नागरङ्गकपिप्पली ॥
कदली लवली धात्री फलान्यगुड़मैक्षवम् ।
अतैलपक्वं मुनयो हविष्यान्नं प्रचक्षते ॥"
अत्रास्विन्नमित्युपादानादन्यत्र स्विन्नधान्यतण्डुलेन दोषः । हैमन्तिकमित्यभिधाय अगस्त्यसंहितायाम् ।
'नारिकेलफलञ्चैव कदलीं लवलीन्तथा ।
आम्रमामलकञ्चैव पनसञ्च हरीतकीम् ।
व्रतान्तरप्रशस्तञ्च हविष्यं मन्वते बुधाः ॥"
इति तिथ्यादितत्त्वम् ॥

हव्यं, क्ली, (हूयते इति । हु+यत् ।) देवान्नम् । इत्यमरः । २ । ७ । २४ ॥ (यथा, मनुः । ३।९७।
"नश्यन्ति हव्यकव्यानि नराणामविजानताम् ।
भस्मीभूतेषु विप्रेषु मोहाद्दत्तानि दातृभिः ॥")
हवनीयद्रव्यञ्च ॥

हव्यपाकः, पुं, ( हव्याय पाको यस्य । ) चरुः । इत्यमरः । २ । ७ । २२ ॥

हव्यवाहः, पुं, हव्यं वहतीति । वह+अण् । ) अग्निः । इति रत्नमाला ॥ ( यथा, महाभारते । १ । २२४ । ५८ ।
"एतच्छ्रुत्वा हुतवहाद्भगवान् सर्व्वलोकभृत् ।
हव्यवाहमिदं वाक्यमुवाच प्रहसन्निव ॥" )

हव्यवाहनः, पुं, (हव्यं वाहयतीति । वह+णिच्+ल्युः ।) अग्निः । इत्यमरः । १ । १ । ५८ ॥ ( यथा, महाभारते । १ । २२४ । १३ ।
'न ह्येतत् कारणं ब्रह्मन्नल्पं सम्प्रतिभाति मे ।
यद्ददाह सुसंक्रुद्धः खाण्डवं हव्यवाहनः ॥" )

हव्याशः, पुं, ( हव्यमश्नातीति । हव्य+अश्+अण् । ) हुताशनः । इति शब्दरत्नावली ॥

हव्याशनः, पुं, ( हव्यं अशनं यस्य । ) अग्निः । इति हेमचन्द्रः ॥

हस, ए हासे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-उपहासे सक०-सेट् ।) ए, अहसीत् । हासोऽपूर्व्वप्रतीत्या कपोलस्य विकसितीकरणम् । तत्रैवाकर्म्मकः । हसति शनैः शुष्कहदितखरी । इति गोवर्द्धनः । यदा तु कस्यचिद्दोषादिकमुद्दिश्य तत् स्यात्तदा सकर्म्मकः । हसन्तमन्तर्व्वलमर्व्वतां रवेरिति श्रीहर्षः ॥ हसन्ति साधवश्चौरम् । इति दुर्गादासः ॥

हसः, पुं, (हसनमिति । हस+"स्वनहसोर्वा ।" ३ । ३ । ६२ । इति अप् । ) हास्यम् । इत्यमरः । १ । ७ । १८ ॥ ( यथा, वाजसनेयसंहितायाम् । ३० । ६ .
"हसाय कारिमानन्दाय स्त्रीषखमिति ॥")

हसन्, [त्] त्रि, हास्यं कुर्व्वन् । हसधातोः शतृप्रत्ययेन निष्पन्नः ॥ ( यथा, हरिवंशे ।१४६।२७।
"हसन् विहासांश्च जहाति हर्षात्
वाष्पागमं कृष्णविनोदनार्थम् ॥")

हसनं, क्ली, ( हस+ल्युट् । ) हास्यम् । इति मेदिनी ॥ ( यथा, बृहत्संहितायाम् ।४६।२५ ।
"हसने देशभ्रंशं रुदिते च व्याधिबाहुल्यम् ॥)

हसनी, स्त्री, ( हसतीति । हस+कृत्यल्युट इति ल्युट् । टिड्ढेति ङीप् । ) अङ्गारधानी । इति मेदिनी ॥

हसनीमणिः, पुं, अग्निः । इति त्रिकाण्डशेषः ॥

हसन्तिका, स्त्री अङ्गारधानी । इति हेमचन्द्रः ॥

हसन्ती, स्त्री, ( हसतीति । हस+शतृ । ङीप् ।) अङ्गारधानिका । इत्यमरः । २ । ९ । २९ ॥ मल्लिकाविशेषः । शाकिनीभेदः । इति मेदिनी ॥ (हास्यं कुर्व्वती । यथा कथासरित्सागरे । ११ । ३१ ।
"अस्तीहोर्ज्जयिनी नाम नगरी भूषणं भुवः ।
हसन्तीव सुधाधौतैः प्रासादैरमरावतीम् ॥")

हसिकः, त्रि, ( हसो हासोऽस्त्यस्येति । ठन् । ) हास्यकर्त्ता । इति केचित् ॥ हसशब्दात् ष्णिकप्रत्ययेन निष्पन्नः ॥

हसितं, क्ली, ( हस+क्तः । ) हास्यम् । ( यथा, बृहत्संहितायाम् । ६८ । ७४ ।
"हसितं शुभदमकम्पं
स निमीलितलोचनञ्च पापस्य ।
दुष्टस्य हसितमसकृत्
सोन्मादस्यासकृत् प्रान्ते ॥")
कामदेवधनुः । इति केचित् ॥ ( हास्यकरणम् । यथा, कथासरित्सागरे । ५९ । १५९ ।
"अथ कर्म्मगतं मित्रं दृष्ट्वास्य हसितं मया ॥"
परिहासः । यथा, किराते । १३ । ४७ ।
"कीर्त्तितानि हसितेऽपि तानि यं
व्रीड़यन्ति चरितानि मानिनम् ॥")

हसितः, त्रि, ( हस+क्तः । ) विकसितः । इति शब्दमाला ॥ कृतहासश्च ॥

हस्तं, क्ली, ( हस+तन् । ) चर्म्मप्रसेविका । इति केचित् ॥

हस्तः, पुं, ( हसति विकशतीति । हस+"हसिमृग्रिण्वामीति ।" उणा० ३ । ८६ । इति तन् । ) शरीरावयवविशेषः । स च कर्म्मेन्द्रियः । हात इति भाषा । तत्पर्य्यायः । पाणिः २ शमः ३ शयः ४ । इत्यमरमाला ॥ पञ्चशाखः ५ । इत्यमरः ॥ करः ६ भुजः ७ । इति जटाधर ॥ कुलिः ८ भुजादलः ९ । इति शब्दरत्नावली ॥
"हस्तावध्यात्ममित्याहुरध्यात्मविदुषो जनाः ।
अधिभूतञ्च कर्म्माणि शक्रस्तत्राधिदैवतम् ॥"
इति महाभारते आश्वमेधिकपर्व्व ॥
हस्तस्य शुभाशुभलक्षणं बाहुशब्दे द्रष्टव्यम् ॥*॥
विस्तृतकरप्रकोष्ठः । इत्यमरः । २ । ६ । ६८ ॥
स च चतुर्व्विंशत्यङ्गुलपरिमाणम् । इति भरतः ॥
यथा,—
"यवानां तण्डुलैरेकमङ्गुलं चाष्टभिर्भवेत् ।
अदीर्घयोजितैर्हस्तश्चतुर्विंशतिभिरङ्गुलैः ॥"
इति तिथ्यादितत्त्वधृतकालिकापुराणम् ॥
अपि च ।
"यत्रोदरैरङ्गुलमष्टसंख्यै-
र्हस्तोऽङ्गुलैः षड्गुणितैश्चतुर्भिः ।
हस्तैश्चतुर्भिर्भवतीह दण्डः
क्रोशः सहस्रद्वितयेन तेषाम् ॥"
इति लीलावती ॥*॥
हस्तमात्रदत्तस्नेहादिद्रव्यभक्षणनिषेधो यथा,
"हस्तदत्ताश्च ये स्नेहा लवणं व्यञ्जनानि च ।
दातारं नोपतिष्ठन्ते भोक्ता भुङ्क्ते तु किल्बिषम् ॥
तस्मादन्तरितं कृत्वा पर्णेनाथ तृणेन वा ।
प्रदद्यात् न तु हस्तेन नायसेन कदाचन ॥"
इति श्राद्धतत्त्वधृतवशिष्ठवचनम् ॥*॥
एकहस्तदत्तद्रव्यभोजननिषेधो यथा,—
"एकेन पाणिना दत्तं शूद्रदत्तं न भक्षयेत् ।"
इति लघुतादिपुराणवचनम् ॥*॥
हस्तिशुण्डः । यथा, रामायणे ।२।२३।४।
"अग्रहस्तं विधुन्वंस्तु हस्ती हस्तमिवात्मनः ॥")
हस्तानक्षत्रम् । ( यथा, मार्कण्डेये ।३३।११।
"प्रयाति श्रेष्ठतां सत्यं हस्ते श्राद्धप्रदो नरः ॥")
केशात् परे तत्समूहवाचकः । इति मेदिनी ॥

हस्तज्योड़िः, पुं, करज्योड़िवृक्षः । हाताजुड़ि इति हिन्दी भाषा । अस्य गुणः । रसवन्धादिवश्यकृत् । इति राजनिर्घण्टः ॥

हस्तधारणं, क्ली, ( हस्तस्य धारणम् । ) मारणोद्यतस्य निवारणम् । इति हस्तवारणशब्दटीकायां रामाश्रमः । ३ । २ । ५ ॥ ( परित्राणम् । यथा, महाभारते । १ । २१४ । १० ।
"ब्राह्मणस्वे हृते चौरैर्धर्म्मार्थे च विलोपिते ।
रोरूयमाणे च मयि क्रियतां हस्तधारणम् ॥")

हस्तपुच्छं, क्ली, (हस्तस्य पुच्छम् । ) हस्तावयवविशेषः । हातेर पोँछा इति भाषा । तत्पर्य्यायः । कल्मषम् २ । इति त्रिकाण्डशेषः ॥

हस्तबिम्बं, क्ली, (हस्तस्य बिम्बं यत्र ।) स्थासकः । स तु चन्दनादिना देहविलेपनविशेषः । इति हेमचन्द्रः ॥ करप्रतिबिम्बञ्च ॥

हस्तवारणं, क्ली, (हस्तेन वारणम् ।) परित्राणम् । तत्तु मारणोद्यतस्य निवारणम् । इत्यमरः । ३ । २ । ५ ॥ करेण निषेधनञ्च ॥